# श्रीजिनवाक्स्तुतिः

shrIjinavAkstutiH

sanskritdocuments.org

April 14, 2018

shrIjinavAkstutiH

# श्रीजिनवाक्स्तुतिः

## Sanskrit Document Information

Text title : jinavAkstutiH

File name : jinavAkstutiH.itx

Category : devii, jaina, sarasvatI

Location : doc_devii

Transliterated by : DPD

Proofread by : DPD

Latest update : April 14, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

April 14, 2018

*sanskritdocuments.org*

# श्रीजिनवाक्स्तुतिः

श्रीमदर्हद्वाण्यै नमः ।

सर्वज्ञवाणी जयतात्सर्वभाषामयी शुभा ।
पञ्चत्रिंशद्गुणोपेता मनुपूर्वस्वरूपिणी ॥ १॥

दयामय्यमृतमयी वाग्देवी श्रुतदेवता ।
संसृष्टिविगमध्रौव्यदर्शिका भुवनेश्वरी ॥ २॥

ब्रह्मबीजध्वनिमयी श्रीमती वागभवात्मिका ।
ज्ञानदर्शनचारित्ररत्नत्रितयदायिका ॥ ३॥

अर्हद्वक्त्राब्जसम्भूता भव्यकैरवचन्द्रिका !
नयप्रमाणगम्भीरा नवतत्वमान्विता ॥ ४॥

वाग्वादिनी भगवत्ती कुमतिध्वंसकारिणी ।
स्याद्वादिहृदयाम्भोजस्थायिनी मातृकामयी ॥ ५॥

नित्या सरस्वती सत्या ज्योतीरूपा जगद्धिता !
वागीश्वरी सिद्धिदात्री सिद्धबीजमयी परा ॥ ६॥

परमैश्वर्यसहिता गणभृद्गुम्फिता श्रुते ।
सिद्धान्तार्थप्रदाऽचिन्त्याऽनन्तशक्तिश्च सारदा ॥ ७॥

स्याद्वादवादिनी श्रेष्ठा तारिणी भववारिधेः ।
या हृज्जाड्यान्धक्यरस्य हरणे तरणिप्रभा ॥ ८॥ (अष्टभिः कुलकम् ॥)

सा मद्वक्रे निवसताज्ज्ञानानन्दप्रदायिनी ।
नमस्या मामकी तस्यै बोभवीतु मुहुर्मुहुः ॥ ९॥

॥ इति श्रीजिनवाक्स्तुतिः समाप्ता ॥

श्री प्रवचनदेव्यै नमः । णमो बम्भीए लिवीए ।
णमो सुयदेवयाए भगवईए ।

णमो सुयस्स भगवओ । श्री ज्योतिर्मायाभ्यां नमः ।
स्वामिनि ! शासनदेवते ! मत्सान्निध्यं विधेहि विश्वेशी ।
प्रवचनबोधो भगवति ! दयया भक्ताय दातव्यः ॥ १॥

श्रीमदर्हन्मातृकाभ्यो नमः ॥ श्री जिनशासनदेवताभ्यो नमः ॥

श्री प्रवचनमातृभ्यो नमः ।

Encoded and proofread by DPD

*shrIjinavAkstutiH*
pdf was typeset on April 14, 2018

Please send corrections to *sanskrit@cheerful.com*